# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| कक्षा -शास्त्रिद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम्-५ | गुणा: - ७० |
|---|---|---|
| विषय: - फलितज्योतिषम् । | (O.E.- 2.3.5. OLD ) | समय: ८:०० त: ११:०० |
| दिनाङ्क: - १४/१०/२०१९ | सन्दर्भग्रन्थ:-भारतीयकुण्डलीविज्ञानम् | |

**प्रथमान्विति:**

**प्रश्न: १ अधोलिखितेभ्य: कयोश्चित् द्वयो: सान्वयं व्याख्यां करोतु ।** **१०**

(१) खषड्घ्नं भयातं भभोगोद्धृतं तत्खतर्कघ्नधिष्ण्येषु युक्तं द्विनिघ्नम् ।
नवाप्तं शशी भागपूर्वस्तुभुक्ति: खखाभ्राष्टवेदाभभोगेन भक्ता: ॥

(२) गतर्क्षनाडी खरसेषुशुद्धा सूर्योदयादिष्टघटीषु युक्ता ।
भयातसंज्ञा भवतीह तस्य निजर्क्षनाड्यासहितो भभोग: ॥

(३) पंक्ति: स्वेष्टाद् भवेदग्रे पंक्त्यामिष्टं विशोधयेत् ।
तच्चालनमृणं ज्ञेयं व्यत्यये व्यत्ययं विदु: ॥

**प्रश्न: २ अधोलिखितयो: कस्यचित् एकस्य उपरि निबन्धं लिखतु ।** **१०**

(१) सूर्यस्पष्टसाधनम् ।

(२) अयनांशसाधनम् ।

**द्वितीयान्विति:**

**प्रश्न: ३ अधोलिखितेभ्य: कयोश्चित् द्वयो: सान्वयं व्याख्यां करोतु ।** **१०**

(१) मेषादिगे सायनभागसूर्ये दिनाधर्मा या पलभा भवेत् सा ।
त्रिष्ठाहस्तास्युर्दशभिर्भुजंगै र्दिग्भिश्चरार्धानि गुणोद्धृतोऽन्त्या ॥

(२) गृहं होरा च द्रेष्काण: नवांशो द्वादशांशक: ।
त्रिशांशश्चेति षड्वर्गास्ते सौम्यग्रहजाशुभा: ॥

(३) त्रिंशदभागात्मकं लग्नं होरातस्यार्धमुच्यते ।
मार्तण्डेन्दोरयुजिसमभे चन्द्रभान्वोश्च होरे ॥

**प्रश्न: ४ अधोलिखितयो: कस्यचित् एकस्य उपरि निबन्धं लिखतु ।** **१०**

(१) दशमलग्नानयनम् ।

(२) त्रिशांशविचार: ।

## तृतीयान्वितिः

**प्रश्नः ५ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु । १०**

(१) अजवृषमृगाङ्गनाकर्किमीनवणिजांशकेष्विनाद्युच्चाः ।
दशशिख्यष्टाविंशतितिथीन्द्रियत्रिनवविंशेषु ॥

(२) अथोच्यते सप्तकवर्गचक्रं खाभिनां तदबलसाधनार्थम् ।
बलं विना खेटफलं न वक्तुं भवादिजातं च नरः क्षमः स्यात् ॥

(३) सर्वार्धत्रिचतुर्थेन्द्रियर्तुभागान् व्ययाद्धरन्त्यशुभाः ।
सन्तोऽर्धमतो वामं बलवानेकर्क्षगेष्वेकः ॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखत । १०**

(१) दशासाधनं तथा च दशासाधने प्रकाराः ।

(२) पञ्चधामैत्रीवचारः ।

## संयुक्तान्वितिः

**प्रश्नः ७ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु । १०**

(१) बुद्धस्य शत्रुः कः ग्रहः अस्ति ?

(२) सूर्यस्य उच्चराशिः कः ?

(३) विंशोत्तरीदशामानं किम् ?

(४) वृषभस्य लंकोदयमानं किम् ?

(५) भद्रा – अर्थात् किम् ?

(६) भारतीयकुण्डलीविज्ञानम् — ग्रन्थस्य कर्ता कः ?

(७) गतर्क्ष – अर्थात् किम् ?

(८) स्वतुङ्गराशौ अर्थात् किम् ?

(९) क्षोणीपुणम् अर्थात् किम् ?

(१०) भभोगः अर्थात् किम् ?

(११) होराकुण्डल्याम् कति विभागौ स्तः ?

(१२) शुक्लपक्षे का दशा ग्रह्या ?

(१३) अङ्गना अर्थात् कः राशिः ?

(१४) वेदशब्देन का संख्या ग्राह्या ?

(१५) मृगः अर्थात् कः राशिः ?

----oooo----